# श्रीमद् भागवत रसिक कुटुंब

## साधना पंचकम्

वेदो नित्यमधीयतां तदुदितं कर्म स्वनुष्ठीयताम्।
तेनेशस्य विधीयतामपचितिः काम्ये मतिस्त्यज्यताम्,
पापौघः परिधूयतां भवसुखे दोषोऽनुसंधीयताम्।
आत्मेच्छा व्यवसीयतां निजगृहात्तूर्णं विनिर्गम्यताम् ॥1॥

सङ्गः सत्सु विधीयतां भगवतो भक्तिर्दृढाऽऽधीयताम्।
शान्त्यादिः परिचीयतां दृढतरं कर्माशु सन्त्यज्यताम्,
सद्विद्वानुपसृप्यतां प्रतिदिनं तत्पादुका सेव्यतां।
ब्रह्मैकाक्षरमर्थ्यतां श्रुतिशिरोवाक्यं समाकर्ण्यताम्॥2॥

वाक्यार्थश्च विचार्यतां श्रुतिशिरः पक्षः समाश्रीयताम्।
दुस्तर्कात्सुविरम्यतां श्रुतिमतस्तर्कोऽनुसन्धीयताम्,
ब्रह्मास्मीति विभाव्यतामहरहर्गर्वः परित्यज्यताम्।
देहेऽहंमतिरुज्झ्यतां बुधजनैर्वादः परित्यज्यताम्॥3॥

क्षुद्व्याधिश्च चिकित्स्यतां प्रतिदिनं भिक्षौषधं भुज्यताम्।
स्वाद्वन्नं न तु याच्यतां विधिवशात् प्राप्तेन संतुष्यताम्,
शीतोष्णादि विषह्यतां न तु वृथा वाक्यं समुच्चार्यताम्।

औदासीन्यमभिप्स्यतां जनकृपानैष्ठुर्यमुत्सृज्यताम्॥4॥

एकान्ते सुखमास्यतां परतरे चेतः समाधीयताम्।
पूर्णात्मा सुसमीक्ष्यतां जगदिदं तद्बाधितं दृश्यताम्,
प्राक्कर्म प्रविलाप्यतां चितिबलान्नाप्युत्तरैः श्लिष्यताम्।
प्रारब्धं त्विह भुज्यतामथ पर,ब्रह्मात्मना स्थित्यताम्॥5॥